"अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च" सां०का० "अनुपलब्धिरिति वक्ष्यमाणं सिंहावलोकितन्यायेनानुषञ्जनीयम् यथा उत्पतन् वियति पतत्त्री अतिदूरतया सदपि प्रत्यक्षेण नोपलभ्यते" त०कौ०। "त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे" शकु० "न खलु दूरगतोऽप्यतिवर्त्तते महमसाविति बन्धुजनोदितैः" माघः। भावप्राधान्यात् २दूरत्वे च "दूरान्तिकार्थेभ्यो द्वितीया च" पा० असत्त्ववचने प्रातिपदिकार्थे एभ्योद्वितीया चात् पञ्चमीतृतीये स्तः" सि०कौ० "ग्रामस्य दूरं दूरात् दूरेण वा। असत्त्ववचने इत्यनुवृत्तेर्नेह दूरः पन्थाः" सि०कौ० "रामादुद्रस्य यो दूरम्" सुग्धबो० "नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः" सा०द० "सा तस्य कर्मनिर्वृत्तैः दूरं पश्चात् कृता फलैः" रघुः "दूरादपि क्रतुषु यज्वभिरिज्यते यः" माघः "दूरेण ह्यवरं कर्म बुद्धियोगात् धनञ्जय!" गीता "स्तुतिभ्योऽच्युत! रिच्यन्ते दूरेण चरितानि ते" रघुः एतच्छब्दयोगे पञ्चमी षष्ठी च। "दूरं ग्रामस्य ग्रामाद्वा" सि०कौ० अतिशायने इष्ठन् दवादेशे दविष्ठ ईयसुन् दवीयस् अतिशयेन दूरस्थिते त्रि० ईयसुनि स्त्रियां ङीप्। "तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते" माघः। दूरं करोति दूर+णिच् दवादेशः दवयति। "दवयदतिरयेण माम्रवीविभागम्" भट्टिः।

**दूरङ्गम** त्रि० दूरं गच्छति गम-बा० वेदे खच् मुम् च। दूरगामिनि "दूरङ्गमं ज्योतिषां ज्योतिरेकम्" यजु०३४।१। लोके तु ड दूरग इत्येव

**दूरत्व** न० दूरस्य भावः त्व। दैशिके परत्वे तच्च भ्रमविशेषे कारणम् यथोक्तं "दोषोऽप्रमायाजनकः प्रमायास्तु गुणो भवेत्। पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः" भाषा० "क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः" सि०मु०।

**दूरदर्शन** पुंस्त्री० दूरात् पश्यति दृश-ल्यु। १गृध्रे राजनि० जातित्वात् स्त्रियां ङीष्। २पण्डिते पु० दृश-भावे ल्युट्। ३दूरतोवीक्षणे न०। दूरतो दृश्यतेऽनेन दृश-करणे ल्युट्। ४दूरवीक्षणे यन्त्रभेदे (दूरवीन)

**दूरदर्शिन्** त्रि० दूरात् पश्यति कार्योत्पत्तेः प्राक् पश्यति जानाति वा दृश-णिनि। १दूरदर्शके २पण्डिते पु० अमरः ३गृध्रे पुंस्त्री० त्रिका० स्त्रियां ङीप्।

**दूरदृश्** त्रि०दूरात् पश्यति दृश-क्विन्। १दूरदर्शिनि २पण्डिते शब्दर०३गृध्रे हेमच०। क्विन्नन्तत्वात् क्वि पदान्ते च कुः।

**दूरमूल** पु०दूरपर्यन्तं मूलमस्य। मुञ्जतृणे (मुँज)। राजनि०

**दूरवेधिन्** पु० दूरात् वेधोऽस्य साध्यतया इनि। दूरात् लक्ष्यभेदके

**दूरापात** त्रि० दूरमापतति आ+पत-कर्त्तरि ज्वला० ण। दूरपातिनि अस्त्रे णिनि दूरापातिन् तत्रार्थे हेमच०।

**दूरूढा** स्त्री दुर्+रुह-क्त रेफे परे पूर्वाणो दीर्घः। दुस्थतया रूढे जाते क्षुद्ररोगशब्दे ३२८ पृ०दृश्यम्।

**दूरेअमित्र** पु० दूरेऽमित्रः शत्रुर्यस्य वेदे सप्तम्याः अलुक् प्रकृतिभावः। एकोनपञ्चाशन्मरुन्मध्ये मरुद्भेदे। ते च यजु० १७अ०।१ मन्त्रादौ ८० मन्त्रान्ते शुक्रज्योतिश्चेत्यादयोदर्शिताः। "अग्निमित्रश्च दूरेअमित्रश्च गणः" दम०

**दूरेत्य** त्रि० दूरे भवः त्यप्। दूरभवे

**दूरेपाक** त्रि० दूरे पचति पच-ण न्यङ्क्वा० कुत्वम् सप्तम्या अलुक् स०। दूरे पाचके स्त्रियां टाप्। तत्रैव गणे स्त्रीत्वेनापि निर्देशात् लिङ्गविशिष्टपरिभाषाया अनित्यत्वं ज्ञापितम्। [पाचके।

**दूरेपाकु** त्रि० पच-उण् न्यङ्क्वा० कुत्वम् अलुक् स०। दूरे-

**दूरेरितेक्षण** त्रि० दूरे ईरितमीक्षणं येन। दूरपर्यन्तप्रेरितदर्शने केकरे (टेरा) शब्दमाला।

**दूरोह** पु० दुःखेन रुह्यतेऽसौ दुर्+रुह-कर्मणि खल् रेफे परे पूर्वाणो दीर्घः। दुःखेन रोहणीये रोढुमशक्ये आदित्ये लोके तस्य निष्कामज्योतिष्टोमादियज्ञप्रयासजातज्ञानेन साध्यरोहणत्वात् दूरोहत्वम्। "असौ वै दूरोहो योऽसौ तपतीति" ऐत०४।२० श्रुतेस्तस्य तथात्वम्। २दूरारोहमात्रे त्रि०।

**दूरोहण** त्रि० दुःखकरमारोहणमस्य प्रा०ब०। आदित्ये दूरोह शब्दे तस्य तथात्वं दृश्यम् २छन्दोभेदे न०। असौ वा आदित्यो दूरोहणं छन्दः" इति श्रुतिः। "दूरोहणं छन्दः" यजु०१०।५ छान्दसं क्लीवत्वम्। ३दूरारोहणीये त्रि० दुःखेन रोहणं वा। ४दुःसाध्ये रोहणे ५तच्छन्दस्कमन्त्रशंसाभ्यासभेदे च यथोक्तं आश्व०श्रौतसूत्रे

"हंसः शुचिषदिति पच्छोऽर्धर्चशस्त्रिपद्या चतुर्थमनवानसुक्त्वा प्रणुत्यावस्येत्। पुनस्त्रिपद्याऽर्धर्चशः पच्छ एव सप्तमम्" ८।२।१४ "एतास्त्वमित्यं शंसेत्। प्रथमं पच्छः द्वितीयमर्धर्चशः। तृतीयं त्रिभिः पादैरवसाय उत्तमेन पादेन प्रणुत्य चतुर्थमनवानसुक्त्वा प्रणवेनाव सेत्। एतदारोहणम्। अथावरोहणम्। पुनस्त्रि-